# shivaraxAstotraM

# શ્રીશિવરક્ષાસ્તોત્રમ્

## Document Information

Text title : shivarakshAstotram

File name : shivaraksha.itx

Category : raksha, shiva, stotra

Location : doc_shiva

Latest update : November 24, 2006, June 13 2007

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીશિવરક્ષાસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ॥

અસ્ય શ્રીશિવરક્ષાસ્તોત્રમન્ત્રસ્ય યાજ્ઞવલ્ક્ય ઋષિઃ ॥

શ્રી સદાશિવો દેવતા ॥ અનુષ્ટુપ્ છન્દઃ ॥

શ્રીસદાશિવપ્રીત્યર્થં શિવરક્ષાસ્તોત્રજપે વિનિયોગઃ ॥

ચરિતં દેવદેવસ્ય મહાદેવસ્ય પાવનમ્ ।
અપારં પરમોદારં ચતુર્વર્ગસ્ય સાધનમ્ ॥ ૧॥

ગૌરીવિનાયકોપેતં પઞ્ચવક્ત્રં ત્રિનેત્રકમ્ ।
શિવં ધ્યાત્વા દશભુજં શિવરક્ષાં પઠેન્નરઃ ॥ ૨॥

ગંગાધરઃ શિરઃ પાતુ ભાલં અર્ધેન્દુશેખરઃ ।
નયને મદનધ્વંસી કર્ણો સર્પવિભૂષણ ॥ ૩॥

ઘ્રાણં પાતુ પુરારાતિઃ મુખં પાતુ જગત્પતિઃ ।
જિહ્વાં વાગીશ્વરઃ પાતુ કંધરાં શિતિકંધરઃ ॥ ૪॥

શ્રીકણ્ઠઃ પાતુ મે કણ્ઠં સ્કન્ધૌ વિશ્વધુરન્ધરઃ ।
ભુજૌ ભૂભારસંહર્તા કરૌ પાતુ પિનાકધૃક્ ॥ ૫॥

હૃદયં શંકરઃ પાતુ જઠરં ગિરિજાપતિઃ ।
નાભિં મૃત્યુઞ્જયઃ પાતુ કટી વ્યાઘ્રાજિનામ્બરઃ ॥ ૬॥

સક્થિની પાતુ દીનાર્તશરણાગતવત્સલઃ ॥

ઉરૂ મહેશ્વરઃ પાતુ જાનુની જગદીશ્વરઃ ॥ ૭॥

જઙ્ઘે પાતુ જગત્કર્તા ગુલ્ફૌ પાતુ ગણાધિપઃ ॥

ચરણૌ કરુણાસિંધુઃ સર્વાઙ્ગાનિ સદાશિવઃ ॥ ૮॥

એતાં શિવબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત્ ।

સ ભુક્ત્વા સકલાન્કામાન્ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૯॥

ગ્રહભૂતપિશાચાદ્યાસ્ત્રૈલોક્યે વિચરન્તિ યે ।
દૂરાદાશુ પલાયન્તે શિવનામાભિરક્ષણાત્ ॥ ૧૦ ॥

અભયઙ્કરનામેદં કવચં પાર્વતીપતેઃ ।
ભક્ત્યા બિભર્તિ યઃ કણ્ઠે તસ્ય વશ્યં જગત્ત્રયમ્ ॥ ૧૧॥

ઇમાં નારાયણઃ સ્વપ્ને શિવરક્ષાં યથાઽઽદિશત્ ।
પ્રાતરુત્થાય યોગીન્દ્રો યાજ્ઞવલ્ક્યઃ તથાઽલિખત્ ॥ ૧૨॥

ઇતિ શ્રીયાજ્ઞવલ્ક્યપ્રોક્તં શિવરક્ષાસ્તોત્રં સમ્પૂર્ણમ્ ॥

*shivaraxAstotraM*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*